varNoddhAratantravachanAni Explanation of construction of Devanagari letters

वर्णोद्धारतन्त्रवचनानि

Document Information

Text title : varNoddhAratantravachanAni Explanation of construction of Devanagari letters

File name : varNoddhAratantravachanAni.itx

Category : misc, sahitya

Location : doc_z_misc_general

Author : shabdakalpadruma of Radha Kanta Deb. Detailed explanation by Ganapatishastri Hebbar (1902-1987) in Sanskrit and Marathi

Transliterated by : Milind Khadilkar

Proofread by : Milind Khadilkar, NA

Latest update : September 11, 2021

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

Please help to maintain respect for volunteer spirit.

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 11, 2021

sanskritdocuments.org

varNoddhAratantravachanAni Explanation of construction of Devanagari letters

वर्णोद्धारतन्त्रवचनानि

(अ)

दक्षतः कुण्डली भूत्वा कुञ्चिता वामतो गता ।
ततोर्ध्वसङ्गता रेखा दक्षोर्ध्वा तासु शङ्करः ॥

विधिर्नारायणश्चैव सन्तिष्ठेत्क्रमतः सदा ।
अर्धमात्रा शक्तिरूपा ध्यानमस्य प्रचक्षते ॥

(आ)

अकाररूपमासाद्य दक्षक्रोडायता त्वधः ।
ब्रह्मादयस्तथा शक्तिस्तासु तिष्ठन्ति नित्यशः ॥

(इ)

ऊर्ध्वाधः कुञ्जिता मध्ये रेखा तत्सङ्गता भवेत् ।
लक्ष्मीर्वाणी तथेन्द्राणी क्रमात्तास्वेव संवसेत् ॥

शीर्षाधः कुञ्चिता रेखा दक्षोर्ध्वा कामरूपिणी ।
मात्राशक्तिः कोणयुता ध्यानमस्य प्रचक्षते ॥

(ई)

ऊर्ध्वाधः कुञ्चिता मध्ये त्रिकोणाधोगता पुनः ।
अधोगता कोणशीर्षा कुञ्चिता दक्षतः शुभा ॥

शीर्षाद्दक्षे कोणयुता कुञ्चितोर्ध्वगता पुनः ।
चन्द्रसूर्याग्निरूपा सा मात्राशक्तिः प्रकीर्तिता ॥

(उ)

ऊर्ध्वाधो मध्यतः कुब्जा रेखा वामगता शुभा ।
तिष्ठन्ति वायुवह्नीद्राः शक्तिर्मात्रा परा स्मृता ॥

(ऊ)

तद्रूपाधोगता रेखा कुञ्जिता वामतः शुभा ।
तिष्ठन्ति तासु रेखासु यमाग्निवरुणः क्रमात् ॥

अधोर्ध्वगामिनी मात्रा लक्ष्मीर्वाणी च सा स्मृता ॥

(ऋ)
ऊर्ध्वाद्दक्षगता वक्रा त्रिकोणा वामतः स्ततः ।
पुनस्त्वधोदक्शगता मात्राशक्तिः परा स्मृता ॥

मात्रास्य् ब्रह्मविष्ण्वीशास्तिष्ठन्ति क्रमतः पराः ।
(ॠ)
तद्रूपाधोगता दक्षा वामतः कुञ्चिता त्वधेः ।
पुनर्दक्षगता रेखा तासु ब्रह्मेशविष्णवः ॥

मात्राशक्तिः पराज्ञेया ध्यानमस्य प्रवक्षते ॥

(ऌ)
रेखाधः कुण्डली वक्रा दक्षतो वामतो गता ।
वह्नीशवायवस्तासु नित्यं सन्ति च नित्यशः ॥

(ॡ)
तत्कोडतुल्यरूपा च रेखा सा वैष्णवी स्मृता ।
तत्सु (तासु) वन्द्याः सुरेशानि! दुर्गा वाणी सरस्वती ॥

(ए)
कुञ्चिता वामतो रेखा दक्षकोणाऽऽयता त्वधः ।
पुनर्वामगता सैव तासु वह्नीशवायवः ॥

(ऐ)
एकाररूपमध्ये तु किञ्चिद्दक्षे तदोर्ध्वतः ।
चन्द्रेन्द्रभानवस्तासु मात्राशक्तिः क्रमात्स्मृता ।
त्रिधाशक्तिमयी पूर्वा दुर्गा वाणी सरस्वती ॥

(ओ)
वामतः कुण्डलीभूत्वा दक्षान्मध्ये तु कुञ्चिता ।
किञ्चिद्दक्षगता या तु कुञ्चिता वामतस्त्वधः ।
ब्रह्मेशविष्णवस्तासु मात्रा तु ब्रह्मरूपिणी ।
शक्तिश्च परमा सैव ध्यानमस्य प्रवक्षते ॥

(औ)
ओकारदक्षमध्ये तु गता तूर्ध्वगतायता ।
किञ्चित्सा वामतो वक्रा तासु ब्रह्मेशविष्णवः ।
शक्तिर्मध्यगता रेखा ध्यानमस्य प्रवक्ष्यते ॥

(अं)
अकाररूप शीर्षे तु दक्षिणे बिन्दुरूपिणी ।
ब्रह्मा विष्णुश्च रुद्रश्च क्रमशस्तासु तिष्ठति ।
या तु बिन्दुमयी रेखा सैवाद्या शक्तिरूपिणी ॥

(अः)
अकाररूपदक्षे तु द्विबिन्दुरध ऊर्ध्वतः ।
ब्रह्मेशविष्णवस्तासु मात्राशक्तिः समीरिता ।
बिन्दुद्वयान्विता रेखा सैवाद्या शक्तिरीरिता ॥

(क)
वामरेखाभवेद्ब्रह्मा विष्णुर्दक्षिणरेखिका ।
अधोरेखा भवेद्रुद्रो मात्रा साक्षात् सरस्वती ॥

कुण्डली चाङ्कुशाकारा मध्यशून्यं सदाशिवः ।
कदम्बगोलकाकारं ककारं भावयेत्सुधीः ॥

(ख)
शिवरूपा वामरेखा दक्षरेखा प्रजापतिः ।
अधोरेखा विष्णुरूपा साक्षाद्ब्रह्मस्वरूपिणी ॥

वामाद्वामगता रेखा वह्निरूपा च सा स्मृता ।
मात्रा कुण्डलिनी साक्षात्खकारः पञ्चदैवतः ॥

(ग)
अधः कुञ्चितरेखा या गाणेशी सा प्रकीर्तिता ।
ततो दक्षगता या तु कमला तत्र संस्थिता ॥

अधोगता ततो या तु तस्यामीशं सदा वसेत् ।
(घ)
सृष्टिरूपा वामरेखा किञ्चिदाकुञ्चिता ततः ।
कुण्डलीरूपमास्थाय ततोऽधोगत्य दक्षतः ॥

अत ऊर्ध्वंगता रेखा शम्भुर्नारायणस्तयोः ।
ब्रह्मस्वरूपिणी देवी मात्राशक्तिः प्रकीर्तिता ॥

(ङ)
ऊर्ध्वाधः क्रमतो रेखा किञ्चिदाकुञ्चिता ततः ।
अधोगता कुण्डली तु मात्रा शक्तिस्वरूपिणी ।
रेखात्रयेषु ब्रह्मेशविष्णवः सन्ति देवताः ॥

(च)
वार्ताकुवर्तुलाकार ऊर्ध्वाधः क्रमतो गतः ।
रेखात्रयेषु चन्द्राग्निसूर्यास्तिष्ठन्ति नित्यशः ।
शक्तिर्मात्रा तु विज्ञेया ध्यानमस्य प्रचक्षते ॥

(छ)
ऊर्ध्वादधोगता रेखा कुञ्चिता कुण्डली ततः ।
पुनश्चाधोगता तासु सन्ति ब्रह्मेशविष्णवः ॥

(ज)
ऊर्ध्वाधः कुञ्चिता रेखा तासु ब्रह्मेशसंविभुः ।
वाग्देवी कमला नित्या द्विधा मात्रा प्रकीर्तिता ॥

(झ)
त्रिकोणकुण्डलीरूपा वामदक्षिणयोगतः ।
क्रमशस्तासु तिष्ठन्ति चन्द्रसूर्याग्नयः प्रिये ॥

तत्र क्रोडगता मात्रा शक्तिर्ब्रह्मस्वरूपिणी ।
ऊर्ध्वमात्रा तथेन्द्राणी मध्ये नारायणी स्मृता ॥

(ञ)
कुण्डलीरूपमासाद्य दक्षतो वामतस्तथा ।
ऋजुश्चाधोगता मात्रा वामतः कुञ्चिता पुनः ॥

तिष्ठन्ति तासु नित्यासु सूर्येन्द्रवरुणाः सदा ।
कुण्डलीद्वयरूपा तु या मात्रा मध्यतः स्थिता ।
महाशक्तिस्वरूपा सा ध्यानमस्य प्रचक्षते ॥

(ट)
ऊर्ध्वाधः क्रमतो रेखा कुण्डलीरूपतस्त्वधः ।

तिष्ठन्ति तासु नित्यासु कुबेरयमवायवः ॥

मात्रा कोणगता चोर्ध्वा तत ऊर्ध्वगता तु सा ।
या नित्या परमा शक्तिश्चतुर्वर्गप्रदायिनी ॥

(ठ)
वार्ताकुवर्तुलाकारो रेखाधिष्ठितदैवतः ।
तिष्ठन्ति क्रमतो नित्यं चन्द्रसूर्याग्नयः प्रिये ।
मात्राहीनस्तूर्ध्वशिखष्ठकारः परमेश्वरि ॥

(ड)
ऊर्ध्वाधः क्रमतो रेखा मध्ये त्वाकुञ्चिता तथा ।
लक्ष्मीर्वाणी भवानी च क्रमशस्तत्र संस्थिता ।
ब्रह्मरूपा तथा मात्रा महाशक्तिः प्रकीर्तिता ॥

(ढ)
ऊर्ध्वाधः क्रमतो रेखा वामदक्षिणतो गता ।
ततः सा कुण्डलीरूपा विष्णवीशब्रह्मरूपिणी ।
महाशक्तिमयी मात्रा ध्यानमस्य प्रचक्षते ॥

(ण)
कुण्डलीत्वगता रेखा मध्यतस्तत ऊर्ध्वतः ।
वामादधोगता सैव पुनरूर्ध्वं गता प्रिये ॥

(त)
आदौ बिन्दुस्ततो मध्ये कुण्डलीत्ववाप्य सा ।
दक्षाद्वामगता नित्या ब्रह्मविष्णवीशरूपिणी ॥

(थ)
कुञ्चिता कुण्डली भूत्वा वामाद्दक्षिणतस्ततः ।
वामतः कुञ्चिता भूत्वा दक्षाधो दक्षतो गता ॥

ऊर्ध्वं ऋज्वायता रेखा सुरा गङ्गादयः क्रमात् ।
वाणी भवानी लक्ष्मीश्च ध्यानमस्य प्रचक्षते ॥

(द)
त्रिशक्तिसहितं देवि त्रिबिन्दुसहितं तथा ।
आत्मादितत्त्वसंयुक्तं दकारं प्रणमाम्यहम् ॥

(ध)
त्रिकोणरूपरेखायां त्रयो देवा वसन्ति हि ।
विश्वेश्वरी विश्वमाता वामतः स्कन्धतः स्थिता ॥

(न)
वामतः कुण्डली रेखा ऊर्ध्वाधः क्रमतः स्थिता ।
चन्द्राग्निसूर्यरूपा सा मात्रा वाणी प्रकीर्तिता ॥

(प)
कुञ्चिता वामरेखाया कोणाद्दक्षिणतोऽपरा ।
कुञ्चिता साऽपि विज्ञेया मात्रा वामोद्गता तथा ।
शम्भुर्ब्रह्मा भगवती क्रमशस्तासु तिष्ठति ॥

(फ)
वक्रा वामगता रेखा ततोऽधः सङ्गता भवेत् ।
तस्मादूर्ध्वगता भूत्वा दक्षमारभ्य कुण्डली ॥

ब्रह्मा विष्णुश्च रुद्रश्च कुण्डली ब्रह्मरूपिणी ।
मात्रा वामाद्दक्षिणतः क्रमशः परिकीर्तिता ॥

(ब)
त्रिकोणरूपिणी रेखा विष्ण्वीशब्रह्मरूपिणी ।
मात्राशक्तिः पराज्ञेया ध्यानमस्य प्रचक्षते ॥

(भ)
ऊर्ध्वाधः क्रमतो रेखा वामे वक्रा तु कुण्डली ।
पुनश्चाधोगता सैव अत ऊर्ध्वगता पुनः ।
ब्रह्माशम्भुश्च विष्णुश्च क्रमशस्तासु तिष्ठति ॥

अथवा -
किञ्चिदाकुञ्चिता रेखा वामाद्दक्षिणतो गता ।
ततो वक्रा वामगता तासु वाण्यादयः क्रमात् ।
ऋजुमात्रा मध्यगता कोणाद्दक्षगता पुनः ।
महाशक्तिस्वरूपा सा ध्यानमस्य प्रचक्षते ॥

The verse for ma is repeated as for bha, as an alternative

(म)

ऊर्ध्वाधः क्रमतो रेखा वामे वक्रा तु कुण्डली ।
पुनश्चाधोगता सैव अत ऊर्ध्वगता पुनः ।
ब्रह्माशम्भुश्च विष्णुश्च क्रमशस्तासु तिष्ठति ॥

(य)
ऊर्ध्वाधः क्रमतो रेखा चतुष्कोणमयी शुभा ।
नारायणेशविधयः तासु तिष्ठन्ति नित्यशः ।
मात्रा कुण्डलिनी ज्ञेया ध्यानमस्य प्रचक्षते ॥

(र)
दक्षतः कुण्डली रेखा वामाद्दक्षगताप्यधः ।
पुनर्दक्षगता द्वेधा ततोऽधोगत्य चोर्ध्वतः ॥

भवानी शङ्करो वह्निस्तासु तिष्ठन्ति नित्यशः ।
अर्धमात्रा ब्रह्मरूपा महाशक्तिः प्रकीर्तिता ॥

अथवा -
ऊर्ध्वाध क्रमतो रेखा त्रिकोणाधोगता हि सा ।
विधिरीशः केशवश्च तासु तिष्ठन्ति नित्यशः ॥

ऊर्ध्वस्थिता तु या मात्रा सा शक्तिः परिकीर्तिता ।
तस्य मध्यगता रेखा वह्निरूपा हि सा स्मृता ।
निर्गुणोऽसौ सदा वर्णो न कदाचिद् गुणी भवेत् ॥

(ल) (ळ)
कुण्डलीत्रयसंयुक्ता वामाद्दक्षगता त्वधः ।
पुनरूर्ध्वगता रेखा तासु नारायणः शिवः ।
ब्रह्मा शक्तिश्च सन्तिष्ठेत् ध्यानमस्य प्रचक्षते ॥

(व)
कोणत्रयुता रेखा ब्रह्मविष्णुशिवात्मिका ।
माया शक्तिः परा नित्या ध्यानमस्य प्रचक्षते ॥

(श)
कुञ्चिता वामतो दक्षगता तु गोकृतिस्त्वधः ।
पुनरूर्ध्वगता तासु वह्निचन्द्रदिवाकरः ।
मात्रा भवति विज्ञेया ध्यानमस्य प्रचक्षते ॥

(ष)
चतुष्कोणमयी रेखा वामाद्दक्षिणतः क्रमात् ।
वह्नीन्द्रविष्णवस्तासु तिष्ठन्ति क्रमतः सदा ॥

ऊर्ध्वमात्रा शक्तिरूपा महालक्ष्मीसमा स्मृता ।
मात्रा मध्यगता या तु वाग्देवी सा परा स्मृता ॥

(स)
कुञ्चिता वामतो दक्षगता च गोकृतिस्त्वधः ।
पुनरूर्ध्वगता तासु वह्निचन्द्रदिवाकराः ।
मात्रा भवानी विज्ञेया ध्यानमस्य प्रचक्षते ॥

(ह)
ऊर्ध्वादाकुञ्चिता मध्ये कुण्डलीत्वं गता त्वधः ।
पुनरूर्ध्वं गता सैव तासु ब्रह्मादयः क्रमात् ।
मात्रा च पार्वती ज्ञेया ध्यानमस्य प्रचक्षते ॥

इति शब्दकल्पद्रुमान्तर्गतानि वर्णोद्धारतन्त्रवचनानि समाप्ता ।

Encoded and proofread by Milind Khadilkar

varNoddhAratantravachanAni Explanation of construction of Devanagari letters
pdf was typeset on September 11, 2021

Please send corrections to *sanskrit@cheerful.com*